दिनाङ्क :-25.03.2025

प्रात: - 06:55

## रक्षोत्पादनम्

भारतेन स्वदैशिक-रक्षोत्पादने साम्प्रतं यावत् सर्वाधिका वृद्धिः अधिगता। मेकइनइण्डिया इत्येतस्य उपक्रमस्य अनन्तरम् त्रयोविंशत्यधिक-चतुर्विंशत्यधिक-द्विसहस्र-तमवर्षयोः रक्षोत्पादनस्य दत्तांशः सप्तविंशतिसहस्राधिकैकलक्षरूप्यकाणि यावत् सम्प्राप्तः। रक्षामन्त्रालयेन निगदितं यत् कदापि वैदेशिकापूर्तिकर्तृषु निर्भरः अयं देशः अधुना स्वदेशगत- विनिर्माणे उदीयमानत्वेन शक्तित्वेन अग्रे आयाति। यो हि स्वदैशिक-क्षमतानां माध्यमेन स्वसैन्यशक्तिं प्रवर्धयति।

## नड्डा:-क्षयरोगः

केन्द्रीयस्वास्थ्यमन्त्री जे.पी.नड्डाः उद्घोषितवान् तीव्रतर-क्षयरोगोन्मूलनाभियानस्य अधुना देशस्य सर्वेषु जनपदेषु विस्तारं भविष्यति। इतः पूर्वम् एतत् अभियानम् पञ्चपञ्चाशदधिक-चतुश्शतं यावत् चितेषु उच्चप्राथमिकतायुतेषु जनपदेषु प्रचालितम्। ह्यः नवदिल्ल्यां विश्व-क्षयरोगदिवसमवलम्ब्य एकं शिखरं-सम्मेलनं सम्बोधयन् श्रीनड्डाः प्रावोचत् यत् शतदिवसानां तीव्रतर-क्षयरोग-मुक्त-भारताभियानावधौ भूयोऽपि त्रयोदशकोटिसङ्ख्यकानां जनानां क्षयरोगाय परीक्षणं जातम् अपि च सप्तलक्षाधिकानि नवीनानि प्रकरणानि ज्ञातानि। अस्माकं वार्ताहरः सूचितवान् यत् एकपञ्चाशल्लक्षाधिकैककोटिजनाः प्रधानमन्त्री-टीबी-मुक्त-भारताभियानस्य अन्तर्गतं चिकित्सा-सौविध्यं प्राप्नुवन्ति।

## 'मन की बात'-कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य त्रिंशद्दिनाङ्के स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदं विंशत्यधिकैकशततमं संस्करणं भविष्यति।

जना: निजविचारान् अस्य मासस्य अष्टाविंशतितिदिनाङ्कपर्यन्तं माईगोव-नरेन्द्रमोदी-चलदूरभाषीय तन्त्राशयो: प्रेषितुं शक्नुवन्ति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी एकस्मिन् सामाजिकान्तर्जालीय सन्देशपटले मन-की-बात इत्येतस्मै कार्यक्रमाय हर्षं प्रकटितवान्।

**नूतन-वित्तसचिव:**

कर्नाटकसम्भागस्य सप्ताशीत्यधिकनवदशशततमवर्षस्य भारतीय-प्रशासनिकसेवाधिकारी अजयसेठः ह्यः नूतनत्वेन वित्तसचिवत्वेन नियुक्तो जातः। श्रीसेठः वर्तमानसमये वित्तमन्त्रालये आर्थिकविषयाणां विभागस्य सचिवो वर्तते। कार्मिकमन्त्रालयद्वारा प्रसारिते आधिकारिकादेशे कथितं यत् मन्त्रिमण्डलस्य नियुक्तसमित्या सेठः वित्तसचिवपदाय स्वसहमतिः प्रकटिता। परम्परानुसारेण केन्द्रीयवित्तमन्त्रालये वरिष्ठतमः सचिवः एव वित्तसचिवत्वेन नियुक्तो भवतीति।

**नेपाल-भारत-विद्यालयः**

नेपालदेशे ह्यः दैलेखक्षेत्रस्य दूल्लू-नगरपालिकायां श्रीनेपाल-राष्ट्रिय-माध्यमिक-विद्यालयस्य बहूद्देशीयभवनस्य निर्माणस्य शिलान्यासः संस्थापितः। भारत-प्रशासनस्य आर्थिकसाहाय्येन नवत्रिंशन्मिलियन-नेपाली रूप्यकाणां परियोजनायाः व्ययेन अस्य विद्यालयस्य भवनस्य निर्माणं क्रियते। नेपालदेशे स्थितेन भारतीयदूतावासेन विज्ञापितं यत् इदं भवनं भारतप्रशासनस्य नेपाल-भारत-विकाससहयोगानुदानेन निर्मीयते।

**गजायुद्धविरामः**

**वर्तमानस्य गाजा-द्वन्द्वस्य उद्विग्नताम् न्यूनीकर्तुं प्रयतमानः ईजिप्ट्-देशः इस्रायेल्-हमास्-देशयोः मध्ये युद्धविरामस्य पुनःस्थापनं लक्ष्यीकृत्य नूतनं प्रस्तावम् उपस्थापितवान् इति प्रतिवेदनानि सूचयन्ति। ईजिप्षियन्-योजना बन्धक-मुक्तेः सम्भाव्य-निष्कासनस्य च चरणबद्ध-उपायं प्रवर्तयति, येन हमास् समूहः प्रतिसप्ताहं पञ्च इस्रायेलीय-बन्धकान् विमोचयति इति सूच्यते। प्रस्तावित-संरचनायाः अन्तर्गतं बन्धक-मुक्तेः प्रारम्भिक-सप्ताहस्य अनन्तरं इस्रेल्-देशः युद्धविरामस्य द्वितीयं चरणं प्रवर्तयिष्यति।**

**क्रिकेट्**

**इण्डियन-प्रीमियर-लीग इत्यस्यां क्रिकेट-स्पर्धा-मालिकायां ह्यः रात्रौ विशाखापत्तनमस्य वाई.एस.राजशेखर-रेड्डी-**

**क्रिकेट-क्रीडाङ्गणे डेल्ही-कैपिटल्स-दलेन लखनऊ-सुपर-जायंट्स-दलं एकेन स्तोभेन पराजितम्। तत्रैव अद्य**

**अहमदाबादनगरे सार्धसप्तवादने सायंकाले नरेन्द्रमोदीक्रीडाङ्गणे गुजरात-टाइटन्स दलस्य सामुख्यं पञ्जाबकिंग्सदलेन सह भविष्यति।**